# Acintyopāyakauśalyaparivarta

# 𑖀𑖓𑖰𑖡𑖿𑖝𑖿𑖧𑖺𑖢𑖯𑖧𑖎𑖻𑖫𑖩𑖿𑖧𑖢𑖨𑖰𑖪𑖨𑖿𑖝

不可思議方便品

## 方便品第二

§1

tena khalu punaḥ samayena vaiśālyāṃ mahānagaryāṃ
𑖝𑖸𑖡 𑖏𑖩𑖲 𑖢𑖲𑖡𑖾 𑖭𑖦𑖧𑖸𑖡 𑖪𑖹𑖫𑖯𑖩𑖿𑖧𑖯𑖽 𑖦𑖮𑖯𑖡𑖐𑖨𑖿𑖧𑖯𑖽
vimalakīrtir nāma licchaviḥ prativasati sma/ pūrvaji-
𑖪𑖰𑖦𑖩𑖎𑖱𑖨𑖿𑖝𑖰𑖨𑖿 𑖡𑖯𑖦 𑖩𑖰𑖓𑖿𑖔𑖪𑖰𑖾 𑖢𑖿𑖨𑖝𑖰𑖪𑖭𑖝𑖰 𑖭𑖿𑖦/ 𑖢𑖳𑖨𑖿𑖪𑖕𑖰-
nakṛtādhikāraḥ, avaropitakuśalamūlaḥ, bahubuddhapa-
𑖡𑖎𑖴𑖝𑖯𑖠𑖰𑖎𑖯𑖨𑖾, 𑖀𑖪𑖨𑖺𑖢𑖰𑖝𑖎𑖲𑖫𑖩𑖦𑖳𑖩𑖾, 𑖤𑖮𑖲𑖤𑖲𑖟𑖿𑖠𑖢-
ryupāsitaḥ, pratilabdhakṣāntikaḥ, labdhapratibhānaḥ, mahābhi-
𑖨𑖿𑖧𑖲𑖢𑖯𑖭𑖰𑖝𑖾, 𑖢𑖿𑖨𑖝𑖰𑖩𑖤𑖿𑖠𑖎𑖿𑖬𑖯𑖡𑖿𑖝𑖰𑖎𑖾, 𑖩𑖤𑖿𑖠𑖢𑖿𑖨𑖝𑖰𑖥𑖯𑖡𑖾, 𑖦𑖮𑖯𑖥𑖰-
jñāvikrīḍitaḥ, dhāraṇīpratilabdhaḥ, vaiśāradyaprāptaḥ, niha-
𑖕𑖿𑖗𑖯𑖪𑖰𑖎𑖿𑖨𑖱𑖚𑖰𑖝𑖾, 𑖠𑖯𑖨𑖜𑖱𑖢𑖿𑖨𑖝𑖰𑖩𑖤𑖿𑖠𑖾, 𑖪𑖹𑖫𑖯𑖨𑖟𑖿𑖧𑖢𑖿𑖨𑖯𑖢𑖿𑖝𑖾, 𑖡𑖰𑖮-
tamārapratyarthikaḥ, gambhīradharmanayasupraviṣṭaḥ, prajñā-
𑖝𑖦𑖯𑖨𑖢𑖿𑖨𑖝𑖿𑖧𑖨𑖿𑖞𑖰𑖎𑖾, 𑖐𑖦𑖿𑖥𑖱𑖨𑖠𑖨𑖿𑖦𑖡𑖧𑖭𑖲𑖢𑖿𑖨𑖪𑖰𑖬𑖿𑖘𑖾, 𑖢𑖿𑖨𑖕𑖿𑖗𑖯-
pāramitānirjātaḥ, upāyakauśalyagatiṃgataḥ, pratibhāna-
𑖢𑖯𑖨𑖦𑖰𑖝𑖯𑖡𑖰𑖨𑖿𑖕𑖯𑖝𑖾, 𑖄𑖢𑖯𑖧𑖎𑖻𑖫𑖩𑖿𑖧𑖐𑖝𑖰𑖽𑖐𑖝𑖾, 𑖢𑖿𑖨𑖝𑖰𑖥𑖯𑖡-
samanvāgataḥ, satvāśayacaritakuśalaḥ, indriyaparāpa-
𑖭𑖦𑖡𑖿𑖪𑖯𑖐𑖝𑖾, 𑖭𑖝𑖿𑖪𑖯𑖫𑖧𑖓𑖨𑖰𑖝𑖎𑖲𑖫𑖩𑖾, 𑖂𑖡𑖿𑖟𑖿𑖨𑖰𑖧𑖢𑖨𑖯𑖢-
rajñānaniryātaḥ, yathāpratyarhadharmadeśakaḥ, kṛtaniścayaḥ
𑖨𑖕𑖿𑖗𑖯𑖡𑖡𑖰𑖨𑖿𑖧𑖯𑖝𑖾, 𑖧𑖞𑖯𑖢𑖿𑖨𑖝𑖿𑖧𑖨𑖿𑖮𑖠𑖨𑖿𑖦𑖟𑖸𑖫𑖎𑖾, 𑖎𑖴𑖝𑖡𑖰𑖫𑖿𑖓𑖧𑖾
kṛtaśrama iha mahāyāne, suparīkṣitakarmakārī,
𑖎𑖴𑖝𑖫𑖿𑖨𑖦 𑖂𑖮 𑖦𑖮𑖯𑖧𑖯𑖡𑖸, 𑖭𑖲𑖢𑖨𑖱𑖎𑖿𑖬𑖰𑖝𑖎𑖨𑖿𑖦𑖎𑖯𑖨𑖱,

buddheryāpathapratiṣṭhitaḥ, sāgaravarabuddhyanupraviṣṭaḥ, sarvabuddhastutastomitapraśaṃsitaḥ, sarvaśakrabrahmalokapā-lanamaskṛtaḥ, sa satvaparipākāyopāyakauśalyena vaiśā-lyāṃ mahānagaryāṃ prativasati sma/

爾時毘耶離大城中有長者名維摩詰。已曾供養無量諸佛深植善本。得無生忍。辯才無礙。遊戲神通逮諸總持。獲無所畏降魔勞怨。入深法門善於智度。通達方便大願成就。明了衆生心之所趣。又能分別諸根利鈍。久於佛道心已純淑決定大乘。諸有所作能善思量。住佛威儀心大如海。諸佛咨嗟弟子。釋梵世主所敬。欲度人故以善方便居毘耶離。

§ 2

akṣayabhogo daridrānāthasatvasaṃgrahāya/ pariśuddha-Śīlo duḥśīlasaṃgrahāya/ kṣamadamaprāpto duṣṭapraduṣṭa-vyāpannakrudhacittānāṃ satvānāṃ saṃgrahāya/uttaptavīryaḥ kusīdānāṃ satvānāṃ saṃgrahāya/ dhyānasmṛtisamādhisthito vibhrāntacittānāṃ satvānāṃ saṃgrahāya/prajñāniścayaprāpto duḥprajñānāṃ satvānāṃ saṃgrahāya/

資財無量攝諸貧民。奉戒清淨攝諸毀禁。以忍調行攝諸恚怒。以大精進攝諸懈怠。一心禪寂攝諸亂意。以決定慧攝諸無智。

§ 3

avadātavastradhārī śramaṇeryāpathasaṃpannaḥ/ gṛhavāsasthitaḥ kāmadhāturūpadhātvārūpyadhātvasaṃsṛṣṭaḥ/bhāryāputradārāṃś ca saṃdarśayati, sadā ca brahmacārī/ parivāraparivṛtaś ca bhavati, sadā ca vivekacārī/ ābharaṇavibhūṣitaś ca saṃdṛśyate, sadā ca lakṣaṇaparicchinnaḥ/annapānabhojanajīvaḥ saṃdṛśyate, sadā ca dhyānāhāraḥ/ sarvadyūtakaraśālāsu ca saṃdṛśyate, dyūtakrīḍāsaktacittāṃś ca satvān paripācayati, sadā capramādacārī/ sarvapāṣaṇḍapratyeṣakaś ca, buddhe cabhedyāśayaḥ/ sarvalaukikalokottaraśāstravidhijñaś ca, sadā ca dharmārāmaratirataḥ/ sarvasaṃgaṇikāsu ca saṃ-

dṛśyate, sarvatra cagrapūjitaḥ/

𑖟𑖴𑖫𑖿𑖧𑖝𑖸, 𑖭𑖨𑖿𑖪𑖝𑖿𑖨 𑖓𑖐𑖿𑖨𑖢𑖳𑖕𑖰𑖝𑖾/

雖爲白衣奉持沙門清淨律行。雖處居家不著三界。示有妻子常修梵行。現有眷屬常樂遠離。雖服寶飾而以相好嚴身。雖復飲食而以禪悅爲味。若至博奕戲處輒以度人。受諸異道不毀正信。雖明世典常樂佛法。一切見敬爲供養中最。

§4

dharmavādī ca vṛddhamadhyadahrasahāyakaś ca lokā-

𑖠𑖨𑖿𑖦𑖪𑖯𑖟𑖱 𑖓 𑖪𑖴𑖟𑖿𑖠𑖦𑖠𑖿𑖧𑖟𑖮𑖿𑖨𑖭𑖮𑖯𑖧𑖎𑖫𑖿 𑖓 𑖩𑖺𑖎𑖯-

nuvartanāya/

𑖡𑖲𑖪𑖨𑖿𑖝𑖡𑖯𑖧/

sarvavyavahārodyuktaś ca na ca lābhabhogābhilāṣī/

𑖭𑖨𑖿𑖪𑖪𑖿𑖧𑖪𑖮𑖯𑖨𑖺𑖟𑖿𑖧𑖲𑖎𑖿𑖝𑖫𑖿 𑖓 𑖡 𑖓 𑖩𑖯𑖥𑖥𑖺𑖐𑖯𑖥𑖰𑖩𑖯𑖬𑖱/

sarvacatvaraśṛṅgāṭakeṣu ca saṃdṛśyate sarvasatvavai-

𑖭𑖨𑖿𑖪𑖓𑖝𑖿𑖪𑖨𑖫𑖴𑖒𑖿𑖐𑖯𑖘𑖎𑖸𑖬𑖲 𑖓 𑖭𑖽𑖟𑖴𑖫𑖿𑖧𑖝𑖸 𑖭𑖨𑖿𑖪𑖭𑖝𑖿𑖪𑖪𑖹-

nayikatāyai/

𑖡𑖧𑖰𑖎𑖝𑖯𑖧𑖹/

rājakāryānupraviṣṭaś ca satvārakṣāyai/

𑖨𑖯𑖕𑖎𑖯𑖨𑖿𑖧𑖯𑖡𑖲𑖢𑖿𑖨𑖪𑖰𑖬𑖿𑖘𑖫𑖿 𑖓 𑖭𑖝𑖿𑖪𑖯𑖨𑖎𑖿𑖬𑖯𑖧𑖹/

sarvadharmaśravaṇasāṃkathyeṣu ca saṃdṛśyate hīnayā-

𑖭𑖨𑖿𑖪𑖠𑖨𑖿𑖦𑖫𑖿𑖨𑖪𑖜𑖭𑖯𑖽𑖎𑖞𑖿𑖧𑖸𑖬𑖲 𑖓 𑖭𑖽𑖟𑖴𑖫𑖿𑖧𑖝𑖸 𑖮𑖱𑖡𑖧𑖯-

navicchandanāya mahāyāne samādāpanatayā/

𑖡𑖪𑖰𑖓𑖿𑖔𑖡𑖿𑖟𑖡𑖯𑖧 𑖦𑖮𑖯𑖧𑖯𑖡𑖸 𑖭𑖦𑖯𑖟𑖯𑖢𑖡𑖝𑖧𑖯/

sarvalipiśālāsu copasaṃkrāmati dārakaparipāca-

𑖭𑖨𑖿𑖪𑖩𑖰𑖢𑖰𑖫𑖯𑖩𑖯𑖭𑖲 𑖓𑖺𑖢𑖭𑖽𑖎𑖿𑖨𑖯𑖦𑖝𑖰 𑖟𑖯𑖨𑖎𑖢𑖨𑖰𑖢𑖯𑖓-

nāya/

𑖡𑖯𑖧/

sarvagaṇikākulāni ca praviśati kāmadoṣasaṃdarśa-

𑖭 𑖨𑖿𑖪 𑖐 𑖜𑖰 𑖎𑖯 𑖎𑖲 𑖩𑖯 𑖜𑖰 𑖓 𑖢𑖿𑖨 𑖪𑖰 𑖫 𑖝𑖰 𑖎𑖯 𑖦 𑖟𑖺 𑖬 𑖭𑖽 𑖟 𑖨𑖿𑖫 –

nāya/

𑖡𑖯 𑖧 /

sarvakallavālagṛhāṇi ca praviśati smṛtisaṃprajanyo-

𑖭 𑖨𑖿𑖪 𑖎 𑖩𑖿𑖩 𑖪𑖯 𑖩 𑖐𑖴 𑖮𑖯 𑖜𑖰 𑖓 𑖢𑖿𑖨 𑖪𑖰 𑖫 𑖝𑖰 𑖭𑖿𑖦𑖴 𑖝𑖰 𑖭𑖽 𑖢𑖿𑖨 𑖕 𑖡𑖿𑖧𑖺 –

pasthāpanāya/

𑖢 𑖭𑖿𑖞𑖯 𑖢 𑖡𑖯 𑖧 /

執持正法攝諸長幼。一切治生諧偶雖獲俗利不以喜悅。遊諸四衢饒益衆生。入治政法救護一切。入講論處導以大乘。入諸學堂誘開童蒙。入諸婬舍示欲之過。入諸酒肆能立其志。

§5

śreṣṭhiṣu ca śreṣṭhisaṃmataḥ śreṣṭhadharmārocanatāyai/

𑖫𑖿𑖨𑖸 𑖬𑖿𑖘𑖰 𑖬𑖲 𑖓 𑖫𑖿𑖨𑖸 𑖬𑖿𑖘𑖰 𑖭𑖽 𑖦 𑖝𑖾 𑖫𑖿𑖨𑖸 𑖬𑖿𑖘 𑖠 𑖨𑖿𑖦𑖯 𑖨𑖺 𑖓 𑖡 𑖝𑖯 𑖧𑖹 /

gṛhapatiṣu ca gṛhapatisaṃmataḥ sarvagrāhodgrahapa-

𑖐𑖴 𑖮 𑖢 𑖝𑖰 𑖬𑖲 𑖓 𑖐𑖴 𑖮 𑖢 𑖝𑖰 𑖭𑖽 𑖦 𑖝𑖾 𑖭 𑖨𑖿𑖪 𑖐𑖿𑖨𑖯 𑖮𑖺 𑖟𑖿𑖐𑖿𑖨 𑖮 𑖢 –

ricchedāya/

𑖨𑖰 𑖓𑖿𑖔𑖸 𑖟𑖯 𑖧 /

kṣatriyeṣu ca kṣatriyasaṃmataḥ kṣāntisauratyabalaprati-

𑖎𑖿𑖬 𑖝𑖿𑖨𑖰 𑖧𑖸 𑖬𑖲 𑖓 𑖎𑖿𑖬 𑖝𑖿𑖨𑖰 𑖧 𑖭𑖽 𑖦 𑖝𑖾 𑖎𑖿𑖬𑖯 𑖡𑖿𑖝𑖰 𑖭𑖻 𑖨 𑖝𑖿𑖧 𑖤 𑖩 𑖢𑖿𑖨 𑖝𑖰 –

ṣṭhāpanāya/

𑖬𑖿𑖘𑖯 𑖢 𑖡𑖯 𑖧 /

brāhmaṇeṣu ca brāhmaṇasaṃmato mānamadadarpani-

𑖤𑖿𑖨𑖯 𑖮𑖿𑖦 𑖜𑖸 𑖬𑖲 𑖓 𑖤𑖿𑖨𑖯 𑖮𑖿𑖦 𑖜 𑖭𑖽 𑖦 𑖝𑖺 𑖦𑖯 𑖡 𑖦 𑖟 𑖟 𑖨𑖿𑖢 𑖜𑖰 –

rghātanāya/

𑖨𑖿𑖑𑖯 𑖝 𑖡𑖯 𑖧 /

āmātyeṣu camātyasaṃmataḥ sarvarājakāryasahadha-rmaniyojanāya/

kumāreṣu ca kumārasaṃmato rājabhogaiśvaryābhilāṣa-vinivartanāya/

antaḥpureṣu ca kāñcukīyasaṃmataḥ strīkumārikāpari-pācanāya/

若在長者長者中尊爲説勝法。若在居士居士中尊斷其貪著。若在刹利刹利中尊教以忍辱。若在婆羅門婆羅門中尊除其我慢。若在大臣大臣中尊教以正法。若在王子王子中尊示以忠孝。若在内官内官中尊化政宮女。

§6

prākṛtajanānuvartakaś ca sāmānyapuṇyaviśiṣṭādhyā-lambanāya/

śakreṣu ca śakrasaṃmata aiśvaryānityatvasaṃdarśanāya/

brahmasu ca brahmasaṃmato viśeṣajñānasaṃdarśanāya/

lokapāleṣu ca lokapālasaṃmataḥ sarvasatvaparipā-

lanāya/

𑖩𑖡𑖯𑖧/

iti hi vimalakīrtir licchavir evam/ apramā-

𑖂𑖝𑖰 𑖮𑖰 𑖪𑖰𑖦𑖩𑖎𑖱𑖨𑖿𑖝𑖰𑖨𑖿 𑖩𑖰𑖓𑖿𑖔𑖪𑖰𑖨𑖿 𑖊𑖪𑖦𑖿/𑖀𑖢𑖿𑖨𑖦𑖯-

ṇopāyakauśalajñānasamanvāgato vaiśālyāṃ mahānagaryāṃ

𑖜𑖺𑖢𑖯𑖧𑖎𑖻𑖫𑖩𑖕𑖿𑖗𑖯𑖡𑖭𑖦𑖡𑖿𑖪𑖯𑖐𑖝𑖺 𑖪𑖹𑖫𑖯𑖩𑖿𑖧𑖯𑖽 𑖦𑖮𑖯𑖡𑖐𑖨𑖿𑖧𑖯𑖽

prativasati sma/

𑖢𑖿𑖨𑖝𑖰𑖪𑖭𑖝𑖰 𑖭𑖿𑖦/

若在庶民庶民中尊令興福力。若在梵天梵天中尊誨以勝慧。若在帝釋帝釋中尊示現無常。若在護世護世中尊護諸衆生。長者維摩詰。以如是等無量方便饒益衆生。

§7

sa upāyakauśalyena glānam ātmānam upadarśa-

𑖭 𑖄𑖢𑖯𑖧𑖎𑖻𑖫𑖩𑖿𑖧𑖸𑖡 𑖐𑖿𑖩𑖯𑖡𑖦𑖿 𑖁𑖝𑖿𑖦𑖯𑖡𑖦𑖿 𑖄𑖢𑖟𑖨𑖿𑖫-

yati sma/ tasya glānasya vaiśālyāṃ mahānagaryāṃ rāja-

𑖧𑖝𑖰 𑖭𑖿𑖦/𑖝𑖭𑖿𑖧 𑖐𑖿𑖩𑖯𑖡𑖭𑖿𑖧 𑖪𑖹𑖫𑖯𑖩𑖿𑖧𑖯𑖽 𑖦𑖮𑖯𑖡𑖐𑖨𑖿𑖧𑖯𑖽 𑖨𑖯𑖕-

rājamahāmātrāmātyakumārapāriṣadyā brāhmaṇagṛhapatayaḥ

𑖨𑖯𑖕𑖦𑖮𑖯𑖦𑖯𑖝𑖿𑖨𑖯𑖦𑖯𑖝𑖿𑖧𑖎𑖲𑖦𑖯𑖨𑖢𑖯𑖨𑖰𑖬𑖟𑖿𑖧𑖯 𑖤𑖿𑖨𑖯𑖮𑖿𑖦𑖜𑖐𑖴𑖮𑖢𑖝𑖧𑖾

śreṣṭhinaigamajānapadās tadanyāni ca bahūni prāṇi-

𑖫𑖿𑖨𑖸𑖬𑖿𑖘𑖿𑖞𑖰𑖡𑖹𑖐𑖦𑖕𑖯𑖡𑖢𑖟𑖯𑖭𑖿 𑖝𑖟𑖡𑖿𑖧𑖯𑖡𑖰 𑖓 𑖤𑖮𑖳𑖡𑖰 𑖢𑖿𑖨𑖯𑖜𑖰-

sahasrāṇi glānaparipṛcchakāny upasaṃkrāmanti sma/

𑖭𑖮𑖭𑖿𑖨𑖯𑖜𑖰 𑖐𑖿𑖩𑖯𑖡𑖢𑖨𑖰𑖢𑖴𑖓𑖿𑖔𑖎𑖯𑖡𑖿𑖧 𑖄𑖢𑖭𑖽𑖎𑖿𑖨𑖯𑖦𑖡𑖿𑖝𑖰 𑖭𑖿𑖦/

其以方便現身有疾。以其疾故。國王大臣長者居士婆羅門等。及諸王子并餘官屬。無數千人皆往問疾。其往者。

§8

teṣām upasaṃkrāntānāṃ vimalakīrtir licchaviḥ/

𑖝𑖸𑖬𑖯𑖦𑖿 𑖄𑖢𑖭𑖽𑖎𑖿𑖨𑖯𑖡𑖿𑖝𑖯𑖡𑖯𑖽 𑖪𑖰𑖦𑖩𑖎𑖱𑖨𑖿𑖝𑖰𑖨𑖿 𑖩𑖰𑖓𑖿𑖔𑖪𑖰𑖾/

imam eva cāturmahābhautikaṃ kāyam ārabhya dharmaṃ

𑖂𑖦𑖦𑖿 𑖈𑖪 𑖓𑖯𑖝𑖲𑖨𑖿𑖦𑖮𑖯𑖥𑖻𑖝𑖰𑖎𑖽 𑖎𑖯𑖧𑖦𑖿 𑖁𑖨𑖥𑖿𑖧 𑖠𑖨𑖿𑖦𑖽

deśayati sma : evam anityo ’yaṃ mārṣāḥ kāyaḥ, eva-

𑖟𑖸𑖫𑖧𑖝𑖰 𑖭𑖿𑖦 : 𑖈𑖪𑖦𑖿 𑖀𑖡𑖰𑖝𑖿𑖧𑖺 ’𑖧𑖽 𑖦𑖯𑖨𑖿𑖬𑖯𑖾 𑖎𑖯𑖧𑖾, 𑖈𑖪–

m adhruvaḥ, evam anāsvāsikaḥ, evaṃ durbalaḥ, eva-

𑖦𑖿 𑖀𑖠𑖿𑖨𑖲𑖪𑖾, 𑖈𑖪𑖦𑖿 𑖀𑖡𑖯𑖭𑖿𑖪𑖯𑖭𑖰𑖎𑖾, 𑖈𑖪𑖽 𑖟𑖲𑖨𑖿𑖤𑖩𑖾, 𑖈𑖪–

m asāraḥ, evaṃ jarjaraḥ, evam itvaraḥ, evaṃ duḥkhaḥ,

𑖦𑖿 𑖀𑖭𑖯𑖨𑖾, 𑖈𑖪𑖽 𑖕𑖨𑖿𑖕𑖨𑖾, 𑖈𑖪𑖦𑖿 𑖂𑖝𑖿𑖪𑖨𑖾, 𑖈𑖪𑖽 𑖟𑖲𑖾𑖏𑖾,

evam ābādhikaḥ, evaṃ vipariṇāmadharmā, evaṃ bahu-

𑖈𑖪𑖦𑖿 𑖁𑖤𑖯𑖠𑖰𑖎𑖾, 𑖈𑖪𑖽 𑖪𑖰𑖢𑖨𑖰𑖜𑖯𑖦𑖠𑖨𑖿𑖦𑖯, 𑖈𑖪𑖽 𑖤𑖮𑖲–

rogabhājano ’yaṃ mārṣāḥ kāyaḥ/ tatra paṇḍitena niśrayo

𑖨𑖺𑖐𑖥𑖯𑖕𑖡𑖺 ’𑖧𑖽 𑖦𑖯𑖨𑖿𑖬𑖯𑖾 𑖎𑖯𑖧𑖾/𑖝𑖝𑖿𑖨 𑖢𑖜𑖿𑖚𑖰𑖝𑖸𑖡 𑖡𑖰𑖫𑖿𑖨𑖧𑖺

na kartavyaḥ/

𑖡 𑖎𑖨𑖿𑖝𑖪𑖿𑖧𑖾/

維摩詰因以身疾廣爲說法。諸仁者。是身無常無強無力無堅。速朽之法不可信也。爲苦爲惱衆病所集。諸仁者。如此身明智者所不怙。

§ 9

phenapiṇḍopamo ’yaṃ mārṣāḥ kāyo ’parimardanakṣa-

𑖣𑖸𑖡𑖢𑖰𑖜𑖿𑖚𑖺𑖢𑖦𑖺 ’𑖧𑖽 𑖦𑖯𑖨𑖿𑖬𑖯𑖾 𑖎𑖯𑖧𑖺 ’𑖢𑖨𑖰𑖦𑖨𑖿𑖟𑖡𑖎𑖿𑖬–

maḥ/

𑖦𑖾/

budbudopamo ’yaṃ kāyo ’cirasthitikaḥ/

𑖤𑖲𑖟𑖿𑖤𑖲𑖟𑖺𑖢𑖦𑖺 ’𑖧𑖽 𑖎𑖯𑖧𑖺 ’𑖓𑖰𑖨𑖭𑖿𑖞𑖰𑖝𑖰𑖎𑖾/

marīcyupamo ’yaṃ kāyaḥ kleśatṛṣṇāsaṃbhūtaḥ/

𑖦𑖨𑖱𑖓𑖿𑖧𑖲𑖢𑖦𑖺 ’𑖧𑖽 𑖎𑖯𑖧𑖾 𑖎𑖿𑖩𑖸𑖫𑖝𑖴𑖬𑖿𑖜𑖯𑖭𑖽𑖥𑖳𑖝𑖾/

kadalīskandhopamo ’yaṃ kāyo ’sārakatvāt/

𑖎𑖟𑖩𑖱𑖭𑖿𑖎𑖡𑖿𑖠𑖺𑖢𑖦𑖺 ’𑖧𑖽 𑖎𑖯𑖧𑖺 ’𑖭𑖯𑖨𑖎𑖝𑖿𑖪𑖯𑖝𑖿/

yantrabhūto bata ayaṃ kāyo ’sthisnāyuvinibaddhaḥ/

𑖧𑖡𑖿𑖝𑖿𑖨𑖥𑖳𑖝𑖺 𑖤𑖝 𑖀𑖧𑖽 𑖎𑖯𑖧𑖺 ’𑖭𑖿𑖞𑖰𑖭𑖿𑖡𑖯𑖧𑖲𑖪𑖰𑖡𑖰𑖤𑖟𑖿𑖠𑖾/

māyopamo ’yaṃ kāyo viparyāsasaṃbhūtaḥ/

𑖦𑖯𑖧𑖺𑖢𑖦𑖺 ’𑖧𑖽 𑖎𑖯𑖧𑖺 𑖪𑖰𑖢𑖨𑖿𑖧𑖯𑖭𑖭𑖽𑖥𑖳𑖝𑖾/

svapnopamo ’yaṃ kāyo vitathadarśanaḥ/

𑖭𑖿𑖪𑖢𑖿𑖡𑖺𑖢𑖦𑖺 ’𑖧𑖽 𑖎𑖯𑖧𑖺 𑖪𑖰𑖝𑖞𑖟𑖨𑖿𑖫𑖡𑖾/

pratibhāsopamo ’yaṃ kāyaḥ pūrvakarmapratibhāsatayā

𑖢𑖿𑖨𑖝𑖰𑖥𑖯𑖭𑖺𑖢𑖦𑖺 ’𑖧𑖽 𑖎𑖯𑖧𑖾 𑖢𑖳𑖨𑖿𑖪𑖎𑖨𑖿𑖦𑖢𑖿𑖨𑖝𑖰𑖥𑖯𑖭𑖝𑖧𑖯

saṃdṛśyate/

𑖭𑖽𑖟𑖴𑖫𑖿𑖧𑖝𑖸/

pratiśrutkopamo ’yaṃ kāyaḥ pratyayādhīnatvāt/

𑖢𑖿𑖨𑖝𑖰𑖫𑖿𑖨𑖲𑖝𑖿𑖎𑖺𑖢𑖦𑖺 ’𑖧𑖽 𑖎𑖯𑖧𑖾 𑖢𑖿𑖨𑖝𑖿𑖧𑖧𑖯𑖠𑖱𑖡𑖝𑖿𑖪𑖯𑖝𑖿/

meghopamo ’yaṃ kāyaś cittākulavigamalakṣaṇaḥ/

𑖦𑖸𑖑𑖺𑖢𑖦𑖺 ’𑖧𑖽 𑖎𑖯𑖧𑖫𑖿𑖓𑖰 𑖝𑖿𑖝𑖯𑖎𑖲𑖩𑖪𑖰𑖐𑖦𑖩𑖎𑖿𑖬𑖜𑖾/

vidyutsadṛśo ’yaṃ kāyaḥ kṣaṇabhaṅgayukto ’navasthitaḥ/

𑖪𑖰𑖟𑖿𑖧𑖲𑖝𑖿𑖭𑖟𑖴𑖫𑖺 ’𑖧𑖽 𑖎𑖯𑖧𑖾 𑖎𑖿𑖬𑖜𑖥𑖒𑖿𑖐𑖧𑖲𑖎𑖿𑖝𑖺 ’𑖡𑖪𑖭𑖿𑖞𑖰𑖝𑖾/

asvāmiko ’yaṃ kāyo nānāpratyayasaṃbhūtaḥ/

𑖀𑖭𑖿𑖪𑖯𑖦𑖰𑖎𑖺 ’𑖧𑖽 𑖎𑖯𑖧𑖺 𑖡𑖯𑖡𑖯𑖢𑖿𑖨𑖝𑖿𑖧𑖧𑖭𑖽𑖥𑖳𑖝𑖾/

是身如聚沫不可撮摩。是身如泡不得久立。是身如炎從渴愛生。是身如芭蕉中無有堅。是身如幻從顛倒起。是身如夢爲虚妄見。是身如影從業縁現。是身如響屬諸因縁。是身如浮雲須臾變滅。是身如電念念不住。

§ 10

nirvyāpāro ’yaṃ kāyaḥ pṛthivīsadṛśaḥ/

𑖡𑖰𑖨𑖿𑖪𑖿𑖧𑖯𑖢𑖯𑖨𑖺 ’𑖧𑖽 𑖎𑖯𑖧𑖾 𑖢𑖴𑖞𑖰𑖪𑖱𑖭𑖟𑖴𑖫𑖾/

anātmo 'yaṃ kāyo 'psadṛśaḥ/

𑖀 𑖡𑖯 𑖝𑖿𑖦𑖺 '𑖧𑖽 𑖎𑖯 𑖧𑖺 '𑖢𑖿𑖭 𑖟𑖴 𑖫𑖾/

nirjīvo 'yaṃ kāyas tejaḥsadṛśaḥ/

𑖡𑖰 𑖨𑖿𑖕𑖱 𑖪𑖺 '𑖧𑖽 𑖎𑖯 𑖧 𑖭𑖿 𑖝𑖸 𑖕𑖾 𑖭 𑖟𑖴 𑖫𑖾/

niṣpudgalo 'yaṃ kāyo vāyusadṛśaḥ/

𑖡𑖰 𑖬𑖿𑖢𑖲 𑖟𑖿𑖐 𑖩𑖺 '𑖧𑖽 𑖎𑖯 𑖧𑖺 𑖪𑖯 𑖧𑖲 𑖭 𑖟𑖴 𑖫𑖾/

niḥsvabhāvo 'yaṃ kāya ākāśasadṛśaḥ/

𑖡𑖰𑖾 𑖭𑖿𑖪 𑖥𑖯 𑖪𑖺 '𑖧𑖽 𑖎𑖯 𑖧 𑖁 𑖎𑖯 𑖫 𑖭 𑖟𑖴 𑖫𑖾/

是身無主爲如地。是身無我爲如火。是身無壽爲如風。是身無人爲如水。

§ 11

asaṃbhūto 'yaṃ kāyo mahābhūtānām ālayaḥ/

𑖀 𑖭𑖽 𑖥𑖳 𑖝𑖺 '𑖧𑖽 𑖎𑖯 𑖧𑖺 𑖦 𑖮𑖯 𑖥𑖳 𑖝𑖯 𑖡𑖯 𑖦𑖿 𑖁 𑖩 𑖧𑖾/

śūnyo 'yaṃ kāya ātmātmīyavigataḥ/

𑖫𑖳 𑖡𑖿𑖧𑖺 '𑖧𑖽 𑖎𑖯 𑖧 𑖁 𑖝𑖿𑖦𑖯 𑖝𑖿𑖦𑖱 𑖧 𑖪𑖰 𑖐 𑖝𑖾/

jaḍo 'yaṃ kāyas tṛṇakāṣṭhakuḍyaloṣṭapratibhāsasa-

𑖕 𑖚𑖺 '𑖧𑖽 𑖎𑖯 𑖧 𑖭𑖿 𑖝𑖴 𑖜 𑖎𑖯 𑖬𑖿𑖙 𑖎𑖲 𑖚𑖿𑖧 𑖩𑖺 𑖬𑖿𑖘 𑖢𑖿𑖨 𑖝𑖰 𑖥𑖯 𑖭 𑖭–

dṛśaḥ/

𑖟𑖴 𑖫𑖾/

niśceṣṭo 'yaṃ kāyo vātayantrayukto vartate/

𑖡𑖰 𑖫𑖿𑖓𑖸 𑖬𑖿𑖘𑖺 '𑖧𑖽 𑖎𑖯 𑖧𑖺 𑖪𑖯 𑖝 𑖧 𑖡𑖿𑖝𑖿𑖨 𑖧𑖲 𑖎𑖿𑖝𑖺 𑖪 𑖨𑖿𑖝 𑖝𑖸/

rikto 'yaṃ kāyo 'śucipūtisaṃcayaḥ/

𑖨𑖰 𑖎𑖿𑖝𑖺 '𑖧𑖽 𑖎𑖯 𑖧𑖺 '𑖫𑖲 𑖓𑖰 𑖢𑖳 𑖝𑖰 𑖭𑖽 𑖓 𑖧𑖾/

tuccho 'yaṃ kāya ucchādanaparimardanavikiraṇavi-

𑖝𑖲 𑖓𑖿𑖔𑖺 '𑖧𑖽 𑖎𑖯 𑖧 𑖄 𑖓𑖿𑖔𑖯 𑖟 𑖡 𑖢 𑖨𑖰 𑖦 𑖨𑖿𑖟 𑖡 𑖪𑖰 𑖎𑖰 𑖨 𑖜 𑖪𑖰–

dhvansanadharmā/

𑖠𑖿𑖪𑖽 𑖭 𑖡 𑖠 𑖨𑖿𑖦𑖯/

upadruto 'yaṃ kāyaś caturuttaraiś caturbhī

𑖄𑖢𑖟𑖿𑖨𑖲𑖝𑖺 '𑖧𑖽 𑖎𑖯𑖧𑖫𑖿 𑖓𑖝𑖲𑖨𑖲𑖝𑖿𑖝𑖨𑖹𑖫𑖿 𑖓𑖝𑖲𑖨𑖿𑖥𑖱

rogaśataiḥ/

𑖨𑖺𑖐𑖫𑖝𑖹𑖾/

jīrṇodapānasadṛśo 'yaṃ kāyaḥ sadā jarābhibhūtaḥ/

𑖕𑖱𑖨𑖿𑖜𑖺𑖟𑖢𑖯𑖡𑖭𑖟𑖴𑖫𑖺 '𑖧𑖽 𑖎𑖯𑖧𑖾 𑖭𑖟𑖯 𑖕𑖨𑖯𑖥𑖰𑖥𑖳𑖝𑖾/

paryantasthāyī bata ayaṃ kāyo maraṇaparyavasānaḥ/

𑖢𑖨𑖿𑖧𑖡𑖿𑖝𑖭𑖿𑖞𑖯𑖧𑖱 𑖤𑖝 𑖀𑖧𑖽 𑖎𑖯𑖧𑖺 𑖦𑖨𑖜𑖢𑖨𑖿𑖧𑖪𑖭𑖯𑖡𑖾/

vadhakāśīviṣaśūnyagrāmopamo 'yaṃ kāyaḥ skandhadhā-

𑖪𑖠𑖎𑖯𑖫𑖱𑖪𑖰𑖬𑖫𑖳𑖡𑖿𑖧𑖐𑖿𑖨𑖯𑖦𑖺𑖢𑖦𑖺 '𑖧𑖽 𑖎𑖯𑖧𑖾 𑖭𑖿𑖎𑖡𑖿𑖠𑖠𑖯-

tvāyatanaparigṛhītaḥ/

𑖝𑖿𑖪𑖯𑖧𑖝𑖡𑖢𑖨𑖰𑖐𑖴𑖮𑖱𑖝𑖾/

tatra yuṣmābhir evaṃrūpe kāye nirvidvirāga utpā-

𑖝𑖝𑖿𑖨 𑖧𑖲𑖬𑖿𑖦𑖯𑖥𑖰𑖨𑖿 𑖊𑖪𑖽𑖨𑖳𑖢𑖸 𑖎𑖯𑖧𑖸 𑖡𑖰𑖨𑖿𑖪𑖰𑖟𑖿𑖪𑖰𑖨𑖯𑖐 𑖄𑖝𑖿𑖢𑖯-

dayitavyas tathāgatakāye ca spṛhotpādayitavyā/

𑖟𑖧𑖰𑖝𑖪𑖿𑖧𑖭𑖿 𑖝𑖞𑖯𑖐𑖝𑖎𑖯𑖧𑖸 𑖓 𑖭𑖿𑖢𑖴𑖮𑖺𑖝𑖿𑖢𑖯𑖟𑖧𑖰𑖝𑖪𑖿𑖧𑖯/

是身不實四大爲家。是身爲空離我我所。是身無知如草木瓦礫。是身無作風力所轉。是身不淨穢惡充滿。是身爲虛僞。雖假以澡浴衣食必歸磨滅。是身爲災百一病惱。是身如丘井爲老所逼。是身無定爲要當死。是身如毒蛇如怨賊如空聚。陰界諸入所共合成。諸仁者。此可患厭當樂佛身。

§ 12

dharmakāyo hi mārṣāḥ tathāgatakāyo dānanirjātaḥ

𑖠𑖨𑖿𑖦𑖎𑖯𑖧𑖺 𑖮𑖰 𑖦𑖯𑖨𑖿𑖬𑖯𑖾 𑖝𑖞𑖯𑖐𑖝𑖎𑖯𑖧𑖺 𑖟𑖯𑖡𑖡𑖰𑖨𑖿𑖕𑖯𑖝𑖾

śīlanirjātaḥ samādhinirjātaḥ prajñānirjāto vimuktinirjā-

𑖫𑖱𑖩𑖡𑖰𑖨𑖿𑖕𑖯𑖝𑖾 𑖭𑖦𑖯𑖠𑖰𑖡𑖰𑖨𑖿𑖕𑖯𑖝𑖾 𑖢𑖿𑖨𑖕𑖿𑖗𑖯𑖡𑖰𑖨𑖿𑖕𑖯𑖝𑖺 𑖪𑖰𑖦𑖲𑖎𑖿𑖝𑖰𑖡𑖰𑖨𑖿𑖕𑖯-

to vimuktijñānadarśananirjātaḥ/ maitrīkaruṇāmuditopekṣā-

𑖝𑖺 𑖪𑖰 𑖦𑖲 𑖎𑖿𑖝𑖰 𑖕𑖿𑖗𑖯 𑖡 𑖟 𑖨𑖿𑖫 𑖡 𑖡𑖰 𑖨𑖿𑖕𑖯 𑖝𑖾/𑖦𑖹 𑖝𑖿𑖨𑖱 𑖎 𑖨𑖲 𑖜𑖯 𑖦𑖲 𑖟𑖰 𑖝𑖺 𑖢𑖸 𑖎𑖿𑖬𑖯–

nirjātaḥ/ dānadamasaṃyamanirjātaḥ kṣāntisauratyanirjāto

𑖡𑖰 𑖨𑖿𑖕𑖯 𑖝𑖾/ 𑖟𑖯 𑖡 𑖟 𑖦 𑖭𑖽 𑖧 𑖦 𑖡𑖰 𑖨𑖿𑖕𑖯 𑖝𑖾 𑖎𑖿𑖬𑖯 𑖡𑖿𑖝𑖰 𑖭𑖻 𑖨 𑖝𑖿𑖧 𑖡𑖰 𑖨𑖿𑖕𑖯 𑖝𑖺

dṛḍhavīryakuśalamūlanirjāto dhyānavimokṣasamādhisa-

𑖟𑖴 𑖛 𑖪𑖱 𑖨𑖿𑖧 𑖎𑖲 𑖫 𑖩 𑖦𑖳 𑖩 𑖡𑖰 𑖨𑖿𑖕𑖯 𑖝𑖺 𑖠𑖿𑖧𑖯 𑖡 𑖪𑖰 𑖦𑖺 𑖎𑖿𑖬 𑖭 𑖦𑖯 𑖠𑖰 𑖭–

māpattinirjātaḥ śrutaprajñopāyanirjātaḥ/ saptatriṃśadbodhipa-

𑖦𑖯 𑖢 𑖝𑖿𑖝𑖰 𑖡𑖰 𑖨𑖿𑖕𑖯 𑖝𑖾 𑖫𑖿𑖨𑖲 𑖝 𑖢𑖿𑖨 𑖕𑖿𑖗𑖺 𑖢𑖯 𑖧 𑖡𑖰 𑖨𑖿𑖕𑖯 𑖝𑖾/𑖭 𑖢𑖿𑖝 𑖝𑖿𑖨𑖰𑖽 𑖫 𑖟𑖿𑖤𑖺 𑖠𑖰 𑖢–

kṣyanirjātaḥ śamathavidarśanānirjāto daśabalanirjātaś

𑖎𑖿𑖬𑖿𑖧 𑖡𑖰 𑖨𑖿𑖕𑖯 𑖝𑖾 𑖫 𑖦 𑖞 𑖪𑖰 𑖟 𑖨𑖿𑖫 𑖡𑖯 𑖡𑖰 𑖨𑖿𑖕𑖯 𑖝𑖺 𑖟 𑖫 𑖤 𑖩 𑖡𑖰 𑖨𑖿𑖕𑖯 𑖝 𑖫𑖿

caturvaiśāradyanirjātaḥ/ aṣṭādaśāveṇikabuddhadharmanirjātaḥ

𑖓 𑖝𑖲 𑖨𑖿𑖪𑖹 𑖫𑖯 𑖨 𑖟𑖿𑖧 𑖡𑖰 𑖨𑖿𑖕𑖯 𑖝𑖾/𑖀 𑖬𑖿𑖘𑖯 𑖟 𑖫𑖯 𑖪𑖸 𑖜𑖰 𑖎 𑖤𑖲 𑖟𑖿𑖠 𑖠 𑖨𑖿𑖦 𑖡𑖰 𑖨𑖿𑖕𑖯 𑖝𑖾

sarvapāramitānirjātaḥ/ abhijñāvidyānirjātaḥ sarvākuśala-

𑖭 𑖨𑖿𑖪 𑖢𑖯 𑖨 𑖦𑖰 𑖝𑖯 𑖡𑖰 𑖨𑖿𑖕𑖯 𑖝𑖾/𑖀 𑖥𑖰 𑖕𑖿𑖗𑖯 𑖪𑖰 𑖟𑖿𑖧𑖯 𑖡𑖰 𑖨𑖿𑖕𑖯 𑖝𑖾 𑖭 𑖨𑖿𑖪𑖯 𑖎𑖲 𑖫 𑖩–

dharmaprahāṇāya nirjātaḥ sarvakuśaladharmaparigrahanirjā-

𑖠 𑖨𑖿𑖦 𑖢𑖿𑖨 𑖮𑖯 𑖜𑖯 𑖧 𑖡𑖰 𑖨𑖿𑖕𑖯 𑖝𑖾 𑖭 𑖨𑖿𑖪 𑖎𑖲 𑖫 𑖩 𑖠 𑖨𑖿𑖦 𑖢 𑖨𑖰 𑖐𑖿𑖨 𑖮 𑖡𑖰 𑖨𑖿𑖕𑖯–

taḥ satyanirjāto bhūtanirjāto 'pramādanirjātaḥ/ apra-

𑖝𑖾 𑖭 𑖝𑖿𑖧 𑖡𑖰 𑖨𑖿𑖕𑖯 𑖝𑖺 𑖥𑖳 𑖥𑖳 𑖝 𑖡𑖰 𑖨𑖿𑖕𑖯 𑖝𑖺 ’𑖢𑖿𑖨 𑖦𑖯 𑖟 𑖡𑖰 𑖨𑖿𑖕𑖯 𑖝𑖾/𑖀 𑖢𑖿𑖨–

māṇaśubhakarmanirjāto mārṣāḥ tathāgatakāyas tatra

𑖦𑖯 𑖜 𑖫𑖲 𑖥 𑖎 𑖨𑖿𑖦 𑖡𑖰 𑖨𑖿𑖕𑖯 𑖝𑖺 𑖦𑖯 𑖨𑖿𑖬𑖯𑖾 𑖝 𑖞𑖯 𑖐 𑖝 𑖎𑖯 𑖧 𑖭𑖿 𑖝 𑖝𑖿𑖨

yuṣmābhiḥ spṛhā kartavyā/sarvasatvānāṃ ca sarvakleśavyā-

𑖧𑖲 𑖬𑖿𑖦𑖯 𑖥𑖰𑖾 𑖭𑖿𑖢𑖴 𑖮𑖯 𑖎 𑖨𑖿𑖝 𑖪𑖿𑖧𑖯/𑖭 𑖨𑖿𑖪 𑖭 𑖝𑖿𑖪𑖯 𑖡𑖯𑖽 𑖓 𑖭 𑖨𑖿𑖪 𑖎𑖿𑖩𑖸 𑖫 𑖪𑖿𑖧𑖯–

dhiprahāṇāyanuttarāyāṃ samyaksaṃbodhau cittāny utpāda-

𑖠𑖰 𑖢𑖿𑖨 𑖮𑖯 𑖜𑖯 𑖧 𑖡𑖲 𑖝𑖿𑖝 𑖨𑖯 𑖧𑖯𑖽 𑖭 𑖦𑖿𑖧 𑖎𑖿𑖭𑖽 𑖤𑖺 𑖠𑖻 𑖓𑖰 𑖝𑖿𑖝𑖯 𑖡𑖿𑖧 𑖄 𑖝𑖿𑖢𑖯 𑖟–

yitavyāni/

𑖧𑖰 𑖝 𑖪𑖿𑖧𑖯 𑖡𑖰/

所以者何。佛身者即法身也。從無量功德智慧生。從戒定慧解脱解脱知見生。從慈悲喜捨生。從布施持戒忍辱柔和勤行精進禪定解脱三昧多聞智慧諸波羅蜜生。從方便生。從六通生。從三明生。從三十七道品生。從止觀生。從十力四無所畏十八不共法生。從斷一切不善法集一切善法生。從眞實生。從不放逸生。從如是無量清淨法生如來身。諸仁者。欲得佛身斷一切衆生病者。當發阿耨多羅三藐三菩提心。

§ 13

evaṃ vimalakīrtir licchavis tathā saṃnipatitānāṃ

𑖊𑖪𑖽 𑖪𑖰𑖦𑖩𑖎𑖱𑖨𑖿𑖝𑖰𑖨𑖿 𑖩𑖰𑖓𑖿𑖔𑖪𑖰𑖭𑖿 𑖝𑖞𑖯 𑖭𑖽𑖡𑖰𑖢𑖝𑖰𑖝𑖯𑖡𑖯𑖽

teṣāṃ glānaparipṛcchakānāṃ tathā tathā dharmaṃ deśayati

𑖝𑖸𑖬𑖯𑖽 𑖐𑖿𑖩𑖯𑖡𑖢𑖨𑖰𑖢𑖴𑖓𑖿𑖔𑖎𑖯𑖡𑖯𑖽 𑖝𑖞𑖯 𑖝𑖞𑖯 𑖠𑖨𑖿𑖦𑖽 𑖟𑖸𑖫𑖧𑖝𑖰

yad bahūni satvaśatasahasrāṇy anuttarāyāṃ samyaksaṃ-

𑖧𑖟𑖿 𑖤𑖮𑖳𑖡𑖰 𑖭𑖝𑖿𑖪𑖫𑖝𑖭𑖮𑖭𑖿𑖨𑖯𑖜𑖿𑖧 𑖀𑖡𑖲𑖝𑖿𑖝𑖨𑖯𑖧𑖯𑖽 𑖭𑖦𑖿𑖧𑖎𑖿𑖭𑖽–

bodhau cittāny utpādayanti // 𑗁 //

𑖤𑖺𑖠𑖻 𑖓𑖰𑖝𑖿𑖝𑖯𑖡𑖿𑖧 𑖄𑖝𑖿𑖢𑖯𑖟𑖧𑖡𑖿𑖝𑖰 // 𑗁 //

如是長者維摩詰。爲諸問疾者如應説法。令無數千人皆發阿耨多羅三藐三菩提心。

Acintyopāyakauśalyaparivarto nāma dvitīyaḥ //

𑖀𑖓𑖰𑖡𑖿𑖝𑖿𑖧𑖺𑖢𑖯𑖧𑖎𑖻𑖫𑖩𑖿𑖧𑖢𑖨𑖰𑖪𑖨𑖿𑖝𑖺 𑖡𑖯𑖦 𑖟𑖿𑖪𑖰𑖝𑖱𑖧𑖾 //

不可思議方便品 名 第二